# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – २** | गुणाः - ७० |
| विषयः - वेदः | (C.C.- 4.1.1. Old & New ) | |
| दिनाङ्कः - १५/१२/२०१८ | *शुक्लयजुर्वेदसंहिताभाष्यम् ।* | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोरन्यतरा एव कण्डिका पठितभाष्यमनुसृत्य व्याख्यायताम् -** ( ५ )

*(१) युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।*
*विहोत्रादधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥*

*(२) पृथिव्याः सद्यस्थादग्निं पुरीष्यमङ्गिरस्त्वत्खनाभि ।*
*ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् ॥*

**प्रश्नः २ अद्योनिर्दिष्टयोरन्यतर एव प्रश्नः समाधीयताम् -** ( १० )

*(क) माध्यन्दिनसंहितायाः एकादशतमाध्यायस्य विषयान् समुपस्थाप्य तत्राश्वस्य विशेषभूमिकामुपवर्णयत ।*

*(ख) माध्यन्दिनसंहितायाः एकादशाध्यायगतमन्त्राणां विनियोगविवरणमुपस्थापयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टयोः एका एव कण्डिका महीधरभाष्यमनुसृत्य व्याख्यायताम् ।** ( ५ )

*(क) पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यꣳ हसः ॥*

*(ख) उदुत्वा विश्वेदेवा अग्ने भरन्तु चित्तिभिः ।*
*स नो भव शिवस्त्वꣳसुप्रतीको विभावसुः ॥*

**प्रश्नः ४ माध्यन्दिनसंहितायाः द्वादशाध्यायमाश्रित्य चितेः सन्दर्भे यथाज्ञानं लिखत ।** ( १० )

**( अथवा )**

*माध्यन्दिन-संहितायाः द्वादशाध्यायगतदेवताविषये लिखत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधस्तनयोरन्यतरा एव कण्डिका पठितभाष्यालोके व्याख्येया -** ( ५ )

*(क) या ओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा ।*
*मनैनु बभ्रूणामहꣳशतं धामानि सप्त च ॥*

*(ख) या शतेन प्रतनोषि सहस्रेण विरोहसि ।*
*तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥*

**प्रश्नः ६ माध्यन्दिन –संहितायाः द्वादशाध्यायीय-पदार्थान् उपवर्णयत ।** **( १० )**

**( अथवा )**

*माध्यन्दिन-संहितायाः त्रयोदशतममध्यायमाश्रित्य सर्पप्रकारविषये यथाधीतं लिखत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधीतभाष्यमाश्रित्याद्यस्तनयोरन्यतरा कण्डिका व्याख्येया ।** **( ५ )**

*(१) मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ।*
*माध्वीनः सन्त्वोषधीः ॥*

*(२) महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।*
*पिपृतां नो भरीमभिः ॥*

**प्रश्नः ८ अधः संकेतितयोरन्यतरस्य प्रश्नस्योत्तरं प्रस्तूयताम् ।** **( १० )**

*(क) माध्यन्दिन-संहितायाः त्रयोदशाध्यायगताग्नेः स्वरूपमुपस्थापयत ।*

*(ख) माध्यन्दिनसंहितायाः त्रयोदशाध्यायमाश्रित्य सूर्यस्य वैशिष्ट्यमुपपादयत ।*

**प्रश्नः ९ अधोनिर्दिष्टेषु दश-शब्दानामेवार्थमधीतभाष्यानुसारं लिखत ।** **( १० )**

*(१) अध्याभरत् ।*
*(२) युक्तेन मनसा ।*
*(३) महिमानम् ।*
*(४) प्रसुव*
*(५) प्रसवे ।*
*(६) संवतम्*
*(७) प्रतूर्तम्*
*(८) वसु ।*
*(९) मृधः ।*
*(१०) पृतन्यतः ।*
*(११) आपृण ।*
*(१२) परावत ।*
*(१३) सन्या ।*
*(१४) सुमतिः ।*
*(१५) सीद ।*

--००--